श्री महागणपति सहस्रनाम स्तोत्रं

व्यास उवाच |

कथं नाम्नां सहस्रं स्वं गणेश उपदिष्टवान् |

शिवाय तन्ममाचक्ष्व लोकानुग्रहतत्पर || 1 ||

ब्रह्मोवाच |

देवदेवः पुरारातिः पुरत्रयजयोद्यमे |

अनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल || 2 ||

मनसा स विनिर्धार्य ततस्तद्विघ्नकारणं |

महागणपतिं भक्त्या समभ्यर्च्य यथाविधि || 3 ||

विघ्नप्रशमनोपायमपृच्छदपराजितः |

संतुष्टः पूजया शंभोर्महागणपतिः स्वयं || 4 ||

सर्वविघ्नैकहरणं सर्वकामफलप्रदं |

ततस्तस्मै स्वकं नाम्नां सहस्रमिदमब्रवीत् || 5 ||

अस्य श्रीमहागणपति सहस्रनाममालामंत्रस्य महागणपति ऋषिः अनुष्टुप् छंदः श्रीमहागणपतिर्देवता गं बीजं हुं शक्तिः स्वाहा कीलकं श्रीमहागणपति प्रसादसिद्ध्यर्थे जपे विनियोगः |

ध्यानं |

गजवदनमचिंत्यं तीक्ष्णदंष्ट्रं त्रिनेत्रं

बृहदुदरमशेषं भूतिराजं पुराणं |

अमरवरसुपूज्यं रक्तवर्णं सुरेशं

पशुपतिसुतमीशं विघ्नराजं नमामि ||

स्तोत्रं |

ॐ गणेश्वरो गणक्रीडो गणनाथो गणाधिपः |

एकदंष्ट्रो वक्रतुंडो गजवक्त्रो महोदरः || 1 ||

लंबोदरो धूम्रवर्णो विकटो विघ्ननायकः |

सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः || 2 ||

भीमः प्रमोद आमोदः सुरानंदो मदोत्कटः |
हेरंबः शंबरः शंभुर्लंबकर्णो महाबलः || 3 ||

नंदनोऽलंपटोऽभीरुर्मेघनादो गणंजयः |
विनायको विरूपाक्षो धीरशूरो वरप्रदः || 4 ||

महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः |
रुद्रप्रियो गणाध्यक्ष उमापुत्रोऽघनाशनः || 5 ||

कुमारगुरुरीशानपुत्रो मूषकवाहनः |
सिद्धिप्रियः सिद्धिपतिः सिद्धः सिद्धिविनायकः || 6 ||

अविघ्नस्तुंबुरुः सिंहवाहनो मोहिनीप्रियः |
कटंकटो राजपुत्रः शालकः सम्मितोऽमितः || 7 ||

कूष्मांडसामसंभूतिर्दुर्जयो धूर्जयो जयः |
भूपतिर्भुवनपतिर्भूतानांपतिरव्ययः || 8 || [भुवनेशानो]

विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्घृणिः |
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः || 9 ||

ज्येष्ठराजो निधिपतिर्निधिप्रियपतिप्रियः |
हिरण्मयपुरांतःस्थः सूर्यमंडलमध्यगः || 10 ||

कराहतिध्वस्तसिंधुसलिलः पूषदंतभित् |
उमांककेलिकुतुकी मुक्तिदः कुलपालनः || 11 ||

किरीटी कुंडली हारी वनमाली मनोमयः |
वैमुख्यहतदैत्यश्रीः पादाहतिजितक्षितिः || 12 ||

सद्योजातस्वर्णमुंजमेखली दुर्निमित्तहृत् |
दुःस्वप्नहृत्प्रसहनो गुणी नादप्रतिष्ठितः || 13 ||

सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः |
पीतांबरः खंडरदः खंडेंदुकृतशेखरः || 14 ||

चित्रांकश्यामदशनो फालचंद्रश्चतुर्भुजः |
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः || 15 ||

गणाधिराजो विजयस्थिरो गजपतिध्वजी |
देवदेवः स्मरप्राणदीपको वायुकीलकः || 16 ||

विपश्चिद्वरदो नादोन्नादभिन्नबलाहकः |
वराहरदनो मृत्युंजयो व्याघ्राजिनांबरः || 17 ||

इच्छाशक्तिधरो देवत्राता दैत्यविमर्दनः |
शंभुवक्त्रोद्भवः शंभुकोपहा शंभुहास्यभूः || 18 ||

शंभुतेजाः शिवाशोकहारी गौरीसुखावहः |
उमांगमलजो गौरीतेजोभूः स्वर्धुनीभवः || 19 ||

यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः |
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्छ्रुतिः || 20 ||

ब्रह्मांडकुंभश्चिद्व्योमफालः सत्यशिरोरुहः |
जगज्जन्मलयोन्मेषनिमेषोऽग्न्यर्कसोमदृक् || 21 ||

गिरींद्रैकरदो धर्माधर्मोष्ठः सामबृंहितः |
ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः || 22 ||

कुलाचलांसः सोमार्कघंटो रुद्रशिरोधरः |
नदीनदभुजः सर्पांगुळीकस्तारकानखः || 23 ||

भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोत्कटः |
व्योमनाभिः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः || 24 ||

कुक्षिस्थयक्षगंधर्वरक्षःकिन्नरमानुषः |
पृथ्वीकटिः सृष्टिलिंगः शैलोरुर्दस्रजानुकः || 25 ||

पाताळजंघो मुनिपात्कालांगुष्ठस्त्रयीतनुः |
ज्योतिर्मंडललांगूलो हृदयालाननिश्चलः || 26 ||

हृत्पद्मकर्णिकाशालिवियत्केलिसरोवरः |
सद्भक्तध्याननिगडः पूजावारीनिवारितः || 27 ||

प्रतापी कश्यपसुतो गणपो विष्टपी बली |
यशस्वी धार्मिकः स्वोजाः प्रथमः प्रथमेश्वरः || 28 ||

चिंतामणिद्वीपपतिः कल्पद्रुमवनालयः |
रत्नमंडपमध्यस्थो रत्नसिंहासनाश्रयः || 29 ||

तीव्राशिरोधृतपदो ज्वालिनीमौलिलालितः |
नंदानंदितपीठश्रीर्भोगदाभूषितासनः || 30 ||

सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः |
तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः || 31 ||

सविघ्ननाशिनीपीठः सर्वशक्त्यंबुजाश्रयः |
लिपिपद्मासनाधारो वह्निधामत्रयाश्रयः || 32 ||

उन्नतप्रपदो गूढगुल्फः संवृत्तपार्ष्णिकः |
पीनजंघः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः || 33 ||

निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः |
पीनस्कंधः कंबुकंठो लंबोष्ठो लंबनासिकः || 34 ||

भग्नवामरदस्तुंगसव्यदंतो महाहनुः |
ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः || 35 ||

स्तबकाकारकुंभाग्रो रत्नमौळिर्निरंकुशः |
सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान् || 36 ||

सर्पकोटीरकटकः सर्पग्रैवेयकांगदः |
सर्पकक्ष्योदराबंधः सर्पराजोत्तरीयकः || 37 ||

रक्तो रक्तांबरधरो रक्तमाल्यविभूषणः |
रक्तेक्षणो रक्तकरो रक्ततालोष्ठपल्लवः || 38 ||

श्वेतः श्वेतांबरधरः श्वेतमाल्यविभूषणः |
श्वेतातपत्ररुचिरः श्वेतचामरवीजितः || 39 ||

सर्वावयवसंपूर्णसर्वलक्षणलक्षितः |
सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः || 40 ||

सर्वमंगळमांगळ्यः सर्वकारणकारणं |
सर्वदैककरः शार्ङ्गी बीजापूरी गदाधरः || 41 ||

इक्षुचापधरः शूली चक्रपाणिः सरोजभृत् |
पाशी धृतोत्पलः शालीमंजरीभृत् स्वदंतभृत् || 42 ||

कल्पवल्लीधरो विश्वाभयदैककरो वशी |
अक्षमालाधरो ज्ञानमुद्रावान् मुद्गरायुधः || 43 ||

पूर्णपात्री कंबुधरो विधृतालिसमुद्गकः |
मातुलुंगधरश्चूतकलिकाभृत्कुठारवान् || 44 ||

पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः |
भारतीसुंदरीनाथो विनायकरतिप्रियः || 45 ||

महालक्ष्मीप्रियतमः सिद्धलक्ष्मीमनोरमः |
रमारमेशपूर्वांगो दक्षिणोमामहेश्वरः || 46 ||

महीवराहवामांगो रतिकंदर्पपश्चिमः |
आमोदमोदजननः सप्रमोदप्रमोदनः || 47 ||

समेधितसमृद्धश्रीर्ऋद्धिसिद्धिप्रवर्तकः |
दत्तसौमुख्यसुमुखः कांतिकंदळिताश्रयः || 48 ||

मदनावत्याश्रितांघ्रिः कृत्तदौर्मुख्यदुर्मुखः |
विघ्नसंपल्लवोपघ्नसेवोन्निद्रमदद्रवः || 49 ||

विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः |
तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक् || 50 ||

मोहिनीमोहनो भोगदायिनीकांतिमंडितः |
कामिनीकांतवक्त्रश्रीरधिष्ठितवसुंधरः || 51 ||

वसुंधरामदोन्नद्धमहाशंखनिधिप्रभुः |
नमद्वसुमतीमौलिमहापद्मनिधिप्रभुः || 52 ||

सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः |
ईशानमूर्धा देवेंद्रशिखा पवननंदनः || 53 ||

अग्रप्रत्यग्रनयनो दिव्यास्त्राणांप्रयोगवित् |
ऐरावतादिसर्वाशावारणावरणप्रियः || 54 ||

वज्राद्यस्त्रपरीवारो गणचंडसमाश्रयः |
जयाजयपरीवारो विजयाविजयावहः || 55 ||

अजितार्चितपादाब्जो नित्यानित्यावतंसितः |
विलासिनीकृतोल्लासः शौंडीसौंदर्यमंडितः || 56 ||

अनंतानंतसुखदः सुमंगळसुमंगळः |
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनिषेवितः || 57 ||

सुभगासंश्रितपदो ललितालालिताश्रयः |
कामिनीकामनः काममालिनीकेळिलालितः || 58 ||

सरस्वत्याश्रयो गौरीनंदनः श्रीनिकेतनः |
गुरुगुप्तपदो वाचासिद्धो वागीश्वरीपतिः || 59 ||

नलिनीकामुको वामारामो ज्येष्ठामनोरमः |
रौद्रीमुद्रितपादाब्जो हुंबीजस्तुंगशक्तिकः || 60 ||

विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः |
अमृताब्धिकृतावासो मदघूर्णितलोचनः || 61 ||

उच्छिष्टगण उच्छिष्टगणेशो गणनायकः |
सार्वकालिकसंसिद्धिर्नित्यशैवो दिगंबरः || 62 ||

अनपायोऽनंतदृष्टिरप्रमेयोऽजरामरः |
अनाविलोऽप्रतिरथो ह्यच्युतोऽमृतमक्षरं || 63 ||

अप्रतर्क्योऽक्षयोऽजय्योऽनाधारोऽनामयोऽमलः |
अमोघसिद्धिरद्वैतमघोरोऽप्रमिताननः || 64 ||

अनाकारोऽब्धिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः |
आधारपीठ आधार आधाराधेयवर्जितः || 65 ||

आखुकेतन आशापूरक आखुमहारथः |
इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः || 66 ||

इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः |
इंद्रगोपसमानश्रीरिंद्रनीलसमद्युतिः || 67 ||

इंदीवरदलश्यामः इंदुमंडलनिर्मलः |
इध्मप्रिय इडाभाग इडाधामेंदिराप्रियः || 68 ||

इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः |
ईशानमौलिरीशान ईशानसुत ईतिहा || 69 ||

ईषणात्रयकल्पांत ईहामात्रविवर्जितः |
उपेंद्र उडुभृन्मौलिरुंडेरकबलिप्रियः || 70 ||

उन्नतानन उत्तुंगः उदारत्रिदशाग्रणीः |
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः || 71 ||

ऋग्यजुःसामसंभूतिर्ऋद्धिसिद्धिप्रवर्तकः |
ऋजुचित्तैकसुलभः ऋणत्रयविमोचकः || 72 ||

लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषां |
लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः || 73 ||

एकारपीठमध्यस्थः एकपादकृतासनः |
एजिताखिलदैत्यश्रीरेधिताखिलसंश्रयः || 74 ||

ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः |
ऐरम्मदसमोन्मेषः ऐरावतनिभाननः || 75 ||

ओंकारवाच्य ओंकार ओजस्वानोषधीपतिः |
औदार्यनिधिरौद्धत्यधुर्य औन्नत्यनिस्वनः || 76 ||

अंकुशःसुरनागानामंकुशःसुरविद्विषां |
अःसमस्तविसर्गांतपदेषुपरिकीर्तितः || 77 ||

कमंडलुधरः कल्पः कपर्दी कलभाननः |
कर्मसाक्षी कर्मकर्ता कर्माकर्मफलप्रदः || 78 ||

कदंबगोलकाकारः कूष्मांडगणनायकः |
कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् || 79 ||

खर्वः खड्गप्रियः खड्गखातांतस्थः खनिर्मलः |
खल्वाटशृंगनिलयः खट्वांगी खदुरासदः || 80 ||

गुणाढ्यो गहनो गस्थो गद्यपद्यसुधार्णवः |
गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्वजः || 81 ||

गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः |
गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः || 82 ||

घंटाघर्घरिकामाली घटकुंभो घटोदरः |
चंडश्चंडेश्वरसुहृच्चंडीशश्चंडविक्रमः || 83 ||

चराचरपतिश्चिंतामणिचर्वणलालसः |
छंदश्छंदोवपुश्छंदोदुर्लक्ष्यश्छंदविग्रहः || 84 ||

जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः |
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः || 85 ||

झलज्झलोल्लसद्दानझंकारिभ्रमराकुलः |
टंकारस्फारसंरावष्टंकारिमणिनूपुरः || 86 ||

ठद्वयीपल्लवांतःस्थसर्वमंत्रैकसिद्धिदः |
डिंडिमुंडो डाकिनीशो डामरो डिंडिमप्रियः || 87 ||

ढक्कानिनादमुदितो ढौको ढुंढिविनायकः |
तत्त्वानां परमं तत्त्वं तत्त्वं पदनिरूपितः || 88 ||

तारकांतरसंस्थानस्तारकस्तारकांतकः |
स्थाणुः स्थाणुप्रियः स्थाता स्थावरं जंगमं जगत् || 89 ||

दक्षयज्ञप्रमथनो दाता दानवमोहनः |
दयावान् दिव्यविभवो दंडभृद्दंडनायकः || 90 ||

दंतप्रभिन्नाभ्रमालो दैत्यवारणदारणः |
दंष्ट्रालग्नद्विपघटो देवार्थनृगजाकृतिः || 91 ||

धनधान्यपतिर्धन्यो धनदो धरणीधरः |
ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः || 92 ||

नंद्यो नंदिप्रियो नादो नादमध्यप्रतिष्ठितः |
निष्कळो निर्मलो नित्यो नित्यानित्यो निरामयः || 93 ||

परं व्योम परं धाम परमात्मा परं पदं |
परात्परः पशुपतिः पशुपाशविमोचकः || 94 ||

पूर्णानंदः परानंदः पुराणपुरुषोत्तमः |
पद्मप्रसन्ननयनः प्रणताऽज्ञानमोचनः || 95 ||

प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः |
फलहस्तः फणिपतिः फेत्कारः फाणितप्रियः || 96 ||

बाणार्चितांघ्रियुगळो बालकेळिकुतूहली |
ब्रह्म ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः || 97 ||

बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः |
बृहन्नादाग्र्यचीत्कारो ब्रह्मांडावलिमेखलः || 98 ||

भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः |
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः || 99 ||

भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः |
मंत्रो मंत्रपतिर्मंत्री मदमत्तमनोरमः || 100 ||

मेखलावान् मंदगतिर्मतिमत्कमलेक्षणः |
महाबलो महावीर्यो महाप्राणो महामनाः || 101 ||

यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः |
यशस्करो योगगम्यो याज्ञिको याजकप्रियः || 102 ||

रसो रसप्रियो रस्यो रंजको रावणार्चितः |
रक्षोरक्षाकरो रत्नगर्भो राज्यसुखप्रदः || 103 ||

लक्ष्यं लक्षप्रदो लक्ष्यो लयस्थो लड्डुकप्रियः |
लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः || 104 ||

वरेण्यो वह्निवदनो वंद्यो वेदांतगोचरः |
विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः || 105 ||

वामदेवो विश्वनेता वज्रिवज्रनिवारणः |
विश्वबंधनविष्कंभाधारो विश्वेश्वरप्रभुः || 106 ||

शब्दब्रह्म शमप्राप्यः शंभुशक्तिगणेश्वरः |
शास्ता शिखाग्रनिलयः शरण्यः शिखरीश्वरः || 107 ||

षड्ऋतुकुसुमस्रग्वी षडाधारः षडक्षरः |
संसारवैद्यः सर्वज्ञः सर्वभेषजभेषजं || 108 ||

सृष्टिस्थितिलयक्रीडः सुरकुंजरभेदनः |
सिंदूरितमहाकुंभः सदसद्व्यक्तिदायकः || 109 ||

साक्षी समुद्रमथनः स्वसंवेद्यः स्वदक्षिणः |
स्वतंत्रः सत्यसंकल्पः सामगानरतः सुखी || 110 ||

हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक् |
हव्यो हुतप्रियो हर्षो हृल्लेखामंत्रमध्यगः || 111 ||

क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणः |
क्षिप्रक्षेमकरः क्षेमानंदः क्षोणीसुरद्रुमः || 112 ||

धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः |
विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः || 113 ||

आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः |
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः || 114 ||

मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः |
प्रतिवादिमुखस्तंभो रुष्टचित्तप्रसादनः || 115 ||

पराभिचारशमनो दुःखभंजनकाराकः |
लवस्त्रुटिः कला काष्ठा निमेषस्तत्परः क्षणः || 116 ||

घटी मुहूर्तं प्रहरो दिवानक्तमहर्निशं |
पक्षो मासोऽयनं वर्षं युगं कल्पो महालयः || 117 ||

राशिस्तारा तिथिर्योगो वारः करणमंशकं |
लग्नं होरा कालचक्रं मेरुः सप्तर्षयो ध्रुवः || 118 ||

राहुर्मंदः कविर्जीवो बुधो भौमः शशी रविः |
कालः सृष्टिः स्थितिर्विश्वं स्थावरं जंगमं च यत् || 119 ||

भूरापोऽग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान् |
ब्रह्मा विष्णुः शिवो रुद्रः ईशः शक्तिः सदाशिवः || 120 ||

त्रिदशाः पितरः सिद्धा यक्षा रक्षांसि किन्नराः |
साध्या विद्याधरा भूता मनुष्याः पशवः खगाः || 121 ||

समुद्राः सरितः शैलाः भूतं भव्यं भवोद्भवः |
सांख्यं पातंजलं योगः पुराणानि श्रुतिः स्मृतिः || 122 ||

वेदांगानि सदाचारो मीमांसा न्यायविस्तरः |
आयुर्वेदो धनुर्वेदो गांधर्वं काव्यनाटकं || 123 ||

वैखानसं भागवतं सात्वतं पांचरात्रकं |
शैवं पाशुपतं कालामुखं भैरवशासनं || 124 ||

शाक्तं वैनायकं सौरं जैनमार्हतसंहिता |
सदसद्व्यक्तमव्यक्तं सचेतनमचेतनं || 125 ||

बंधो मोक्षः सुखं भोगोऽयोगः सत्यमणुर्महान् |
स्वस्ति हुं फट् स्वधा स्वाहा श्रौषड्वौषड्वषण्णमः || 126 ||

ज्ञानं विज्ञानमानंदो बोधः संविच्छमो यमः |
एक एकाक्षराधारः एकाक्षरपरायणः || 127 ||

एकाग्रधीरेकवीरः एकानेकस्वरूपधृक् |
द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्वीपरक्षकः || 128 ||

द्वैमातुरो द्विवदनो द्वंद्वातीतो द्वयातिगः |
त्रिधामा त्रिकरस्त्रेता त्रिवर्गफलदायकः || 129 ||

त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः |
चतुर्बाहुश्चतुर्दंतश्चतुरात्मा चतुर्मुखः || 130 ||

चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः |
चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः || 131 ||

चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसंभवः |
पंचाक्षरात्मा पंचात्मा पंचास्यः पंचकृत्यकृत् || 132 ||

पंचाधारः पंचवर्णः पंचाक्षरपरायणः |
पंचतालः पंचकरः पंचप्रणवभावितः || 133 ||

पंचब्रह्ममयस्फूर्तिः पंचावरणवारितः |
पंचभक्ष्यप्रियः पंचबाणः पंचशिवात्मकः || 134 ||

षट्कोणपीठः षट्चक्रधामा षड्ग्रंथिभेदकः |
षडध्वध्वांतविध्वंसी षडंगुलमहाह्रदः || 135 ||

षण्मुखः षण्मुखभ्राता षट्छक्तिपरिवारितः |
षड्वैरिवर्गविध्वंसी षड्ऊर्मिभयभंजनः || 136 ||

षट्तर्कदूरः षट्कर्मनिरतः षड्रसाश्रयः |
सप्तपातालचरणः सप्तद्वीपोरुमंडलः || 137 ||

सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः |
सप्तांगराज्यसुखदः सप्तर्षिगणमंडितः || 138 ||

सप्तच्छंदोनिधिः सप्तहोता सप्तस्वराश्रयः |
सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः || 139 ||

सप्तच्छंदोमोदमदः सप्तच्छंदोमखप्रभुः |
अष्टमूर्तिध्येयमूर्तिरष्टप्रकृतिकारणं || 140 ||

अष्टांगयोगफलभूरष्टपत्रांबुजासनः |
अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः || 141 ||

अष्टपीठोपपीठश्रीरष्टमातृसमावृतः |
अष्टभैरवसेव्योऽष्टवसुवंद्योऽष्टमूर्तिभृत् || 142 ||

अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः |
नवनागासनाध्यासी नवनिध्यनुशासिता || 143 ||

नवद्वारपुराधारो नवाधारनिकेतनः |
नवनारायणस्तुत्यो नवदुर्गानिषेवितः || 144 ||

नवनाथमहानाथो नवनागविभूषणः |
नवरत्नविचित्रांगो नवशक्तिशिरोधृतः || 145 ||

दशात्मको दशभुजो दशदिक्पतिवंदितः |
दशाध्यायो दशप्राणो दशेंद्रियनियामकः || 146 ||

दशाक्षरमहामंत्रो दशाशाव्यापिविग्रहः |
एकादशादिभीरुद्रैःस्तुत एकादशाक्षरः || 147 ||

द्वादशोद्दंडदोर्दंडो द्वादशांतनिकेतनः |
त्रयोदशाभिदाभिन्नविश्वेदेवाधिदैवतं || 148 ||

चतुर्दशेंद्रवरदश्चतुर्दशमनुप्रभुः |
चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः || 149 ||

सामपंचदशः पंचदशीशीतांशुनिर्मलः |
षोडशाधारनिलयः षोडशस्वरमातृकः || 150 ||

षोडशांतपदावासः षोडशेंदुकळात्मकः |
कळासप्तदशी सप्तदशः सप्तदशाक्षरः || 151 ||

अष्टादशद्वीपपतिरष्टादशपुराणकृत् |
अष्टादशौषधीसृष्टिरष्टादशविधिस्मृतः || 152 ||

अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः |
एकविंशःपुमानेकविंशत्यंगुळिपल्लवः || 153 ||

चतुर्विंशतितत्त्वात्मा पंचविंशाख्यपूरुषः |
सप्तविंशतितारेशः सप्तविंशतियोगकृत् || 154 ||

द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः |
षट्त्रिंशत्तत्त्वसंभूतिरष्टत्रिंशत्कळातनुः || 155 ||

नमदेकोनपंचाशन्मरुद्वर्गनिरर्गळः |
पंचाशदक्षरश्रेणी पंचाशद्रुद्रविग्रहः || 156 ||

पंचाशद्विष्णुशक्तीशः पंचाशन्मातृकालयः |
द्विपंचाशद्वपुःश्रेणी त्रिषष्ट्यक्षरसंश्रयः || 157 ||

चतुःषष्ट्यर्णनिर्णेता चतुःषष्टिकळानिधिः |
चतुःषष्टिमहासिद्धयोगिनीबृंदवंदितः || 158 ||

अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः |
चतुर्नवतिमंत्रात्मा षण्णवत्यधिकप्रभुः || 159 ||

शतानंदः शतधृतिः शतपत्रायतेक्षणः |
शतानीकः शतमखः शतधारावरायुधः || 160 ||

सहस्रपत्रनिलयः सहस्रफणभूषणः |
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् || 161 ||

सहस्रनामसंस्तुत्यः सहस्राक्षबलापहः |
दशसाहस्रफणभृत्फणिराजकृतासनः || 162 ||

अष्टाशीतिसहस्राद्यमहर्षिस्तोत्रयंत्रितः |
लक्षाधीशप्रियाधारो लक्षाधारमनोमयः || 163 ||

चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः |
चतुरशीतिलक्षाणां जीवानां देहसंस्थितः || 164 ||

कोटिसूर्यप्रतीकाशः कोटिचंद्रांशुनिर्मलः |
शिवाभवाध्युष्टकोटिविनायकधुरंधरः || 165 ||

सप्तकोटिमहामंत्रमंत्रितावयवद्युतिः |
त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः || 166 ||

अनंतनामाऽनंतश्रीरनंताऽनंतसौख्यदः |
इति वैनायकं नाम्नां सहस्रमिदमीरितं || 167 ||

इदं ब्राह्मे मुहूर्ते वै यः पठेत्प्रत्यहं नरः |
करस्थं तस्य सकलमैहिकामुष्मिकं सुखं || 168 ||

आयुरारोग्यमैश्वर्यं धैर्यं शौर्यं बलं यशः |
मेधा प्रज्ञा धृतिः कांतिः सौभाग्यमतिरूपता || 169 ||

सत्यं दया क्षमा शांतिर्दाक्षिण्यं धर्मशीलता |
जगत्संयमनं विश्वसंवादो वादपाटवं || 170 ||

सभापांडित्यमौदार्यं गांभीर्यं ब्रह्मवर्चसं |
औन्नत्यं च कुलं शीलं प्रतापो वीर्यमार्यता || 171 ||

ज्ञानं विज्ञानमास्तिक्यं स्थैर्यं विश्वातिशायिता |
धनधान्याभिवृद्धिश्च सकृदस्य जपाद्भवेत् || 172 ||

वश्यं चतुर्विधं नृणां जपादस्य प्रजायते |
राज्ञो राजकलत्रस्य राजपुत्रस्य मंत्रिणः || 173 ||

जप्यते यस्य वश्यार्थं स दासस्तस्य जायते |
धर्मार्थकाममोक्षाणामनायासेन साधनं || 174 ||

शाकिनीडाकिनीरक्षोयक्षोरगभयापहं |
साम्राज्यसुखदं चैव समस्तरिपुमर्दनं || 175 ||

समस्तकलहध्वंसि दग्धबीजप्ररोहणं |
दुःखप्रशमनं क्रुद्धस्वामिचित्तप्रसादनं || 176 ||

षट्कर्माष्टमहासिद्धित्रिकालज्ञानसाधनं |
परकृत्योपशमनं परचक्रविमर्दनं || 177 ||

संग्रामरंगे सर्वेषामिदमेकं जयावहं |
सर्ववंध्यात्वदोषघ्नं गर्भरक्षैककारणं || 178 ||

पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदं |
देशे तत्र न दुर्भिक्षमीतयो दुरितानि च || 179 ||

न तद्गृहं जहाति श्रीर्यत्रायं पठ्यते स्तवः |
क्षयकुष्ठप्रमेहार्शोभगंदरविषूचिकाः || 180 ||

गुल्मं प्लीहानमश्मानमतिसारं महोदरं |
कासं श्वासमुदावर्तं शूलशोकादिसंभवं || 181 ||

शिरोरोगं वमिं हिक्कां गंडमालामरोचकं |
वातपित्तकफद्वंद्वत्रिदोषजनितज्वरं || 182 ||

आगंतुं विषमं शीतमुष्णं चैकाहिकादिकं |
इत्याद्युक्तमनुक्तं वा रोगं दोषादिसंभवं || 183 ||

सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपात् |
सकृत्पाठेन संसिद्धिः स्त्रीशूद्रपतितैरपि || 184 ||

सहस्रनाममंत्रोऽयं जपितव्यः शुभाप्तये |
महागणपतेः स्तोत्रं सकामः प्रजपन्निदं || 185 ||

इच्छितान्सकलान् भोगानुपभुज्येह पार्थिवान् |
मनोरथफलैर्दिव्यैर्व्योमयानैर्मनोरमैः || 186 ||

चंद्रेंद्रभास्करोपेंद्रब्रह्मशर्वादिसद्मसु |
कामरूपः कामगतिः कामतो विचरन्निह || 187 ||

भुक्त्वा यथेप्सितान्भोगानभीष्टान् सह बंधुभिः |
गणेशानुचरो भूत्वा महागणपतेः प्रियः || 188 ||

नंदीश्वरादिसानंदीनंदितः सकलैर्गणैः |
शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः || 189 ||

शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः |
जातिस्मरो धर्मपरः सार्वभौमोऽभिजायते || 190 ||

निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशतत्परः |
योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंस्थितः || 191 ||

निरंतरोदितानंदे परमानंदसंविदि |
विश्वोत्तीर्णे परे पारे पुनरावृत्तिवर्जिते || 192 ||

लीनो वैनायके धाम्नि रमते नित्यनिर्वृतः |
यो नामभिर्हुनेदेतैरर्चयेत्पूजयेन्नरः || 193 ||

राजानो वश्यतां यांति रिपवो यांति दासतां |
मंत्राः सिद्ध्यंति सर्वेऽपि सुलभास्तस्यसिद्धयः || 194 ||

मूलमंत्रादपि स्तोत्रमिदं प्रियतरं मम |
नभस्ये मासि शुक्लायां चतुर्थ्यां मम जन्मनि || 195 ||

दूर्वाभिर्नामभिः पूजां तर्पणं विधिवच्चरेत् |
अष्टद्रव्यैर्विशेषेण जुहुयाद्भक्तिसंयुतः || 196 ||

तस्येप्सितानि सर्वाणि सिद्ध्यंत्यत्र न संशयः |
इदं प्रजप्तं पठितं पाठितं श्रावितं श्रुतं || 197 ||

व्याकृतं चर्चितं ध्यातं विमृष्टमभिनंदितं |
इहामुत्र च सर्वेषां विश्वैश्वर्यप्रदायकं || 198 ||

स्वच्छंदचारिणाप्येष येनायं धार्यते स्तवः |
स रक्ष्यते शिवोद्भूतैर्गणैरध्युष्टकोटिभिः || 199 ||

पुस्तके लिखितं यत्र गृहे स्तोत्रं प्रपूजयेत् |
तत्र सर्वोत्तमा लक्ष्मीः सन्निधत्ते निरंतरं || 200 ||

दानैरशेषैरखिलैर्व्रतैश्च
तीर्थैरशेषैरखिलैर्मखैश्च |
न तत्फलं विंदति यद्गणेश-
सहस्रनाम्नां स्मरणेन सद्यः || 201 ||

एतन्नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं प्रोज्जिहाने
सायं मध्यंदिने वा त्रिषवणमथवा संततं वा जनो यः |
स स्यादैश्वर्यधुर्यः प्रभवति वचसां कीर्तिमुच्चैस्तनोति
प्रत्यूहं हंति विश्वं वशयति सुचिरं वर्धते पुत्रपौत्रैः || 202 ||

अकिंचनोऽपि मत्प्राप्तिचिंतको नियताशनः |
जपेत्तु चतुरो मासान्गणेशार्चनतत्परः || 203 ||

दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि |
लभते महतीं लक्ष्मीमित्याज्ञा पारमेश्वरी || 204 ||

आयुष्यं वीतरोगं कुलमतिविमलं संपदश्चार्तदानाः
कीर्तिर्नित्यावदाता भणितिरभिनवा कांतिरव्याधिभव्या |
पुत्राः संतः कलत्रं गुणवदभिमतं यद्यदेतच्च सत्यं
नित्यं यः स्तोत्रमेतत्पठति गणपतेस्तस्य हस्ते समस्तं || 205 ||

गणंजयो गणपतिर्हेरंबो धरणीधरः |
महागणपतिर्लक्षप्रदः क्षिप्रप्रसादनः || 206 ||

अमोघसिद्धिरमितो मंत्रश्चिंतामणिर्निधिः |
सुमंगळो बीजमाशापूरको वरदः शिवः || 207 ||

काश्यपो नंदनो वाचासिद्धो ढुंढिविनायकः |
मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान् || 208 ||

यः स्तौति मद्गतमना ममाराधनतत्परः |
स्तुतो नाम्नां सहस्रेण तेनाहं नात्र संशयः || 209 ||

नमो नमः सुरवरपूजितांघ्रये
नमो नमो निरुपममंगळात्मने |
नमो नमो विपुलपदैकसिद्धये
नमो नमः करिकलभाननाय ते || 210 ||

किंकिणीगणरणितस्तवचरणः
प्रकटितगुरुमतिचरितविशेषः |
मदजललहरीकलितकपोलः
शमयतु दुरितं गणपतिदेवः || 211 ||

इति श्रीगणेशपुराणे उपासनाखंडे महागणपतिप्रोक्तं श्रीमहागणपति सहस्रनामस्तोत्रं संपूर्णं |